तद्धितादेशः तद्धितवद् भवति[1]–दाधिकम्। अद्यतनम्। ‘कृत्तद्धितसमासाश्च’ (१.२.४६/१७९) इति प्रातिपदिकसञ्ज्ञा भवति।

अव्ययादेशोऽव्ययवद् भवति[2]–प्रस्तुत्य। [3]प्रहृत्य। उपहृत्य। उपस्तुत्य। ‘अव्ययादाप्सुपः’ (२.४.८२/४५२) इति [4]सुब्लुग् भवति।

सुबादेशः सुब्वद् भवति–वृक्षाय। प्लक्षाय। ‘सुपि च’ (७.३.१०२/२०२) इति दीर्घत्वं भवति।

तिङादेशः तिङ्वद् भवति–अकुरुताम्। अकुरुतम्। ‘सुप्तिङन्तं पदम्’ (१.४.१४/२९) इति पदसञ्ज्ञा भवति।

[5]पदादेशः पदवद् भवति–ग्रामो वः स्वम्। जनपदो नः[6] स्वम्। ‘पदस्य’ (८.१.१६/४०१) इति रुत्वं भवति।

वत्करणं किम्? स्थानी आदेशस्य सञ्ज्ञा मा विज्ञायि इति। [7]स्वाश्रयमपि यथा स्यात्। ‘आङो यमहनः’ (१.३.२८/२६९५) - आहत, आवधिष्ट इति आत्मनेपदमुभयत्रापि भवति। आदेशग्रहणं किम्? आनुमानिकस्याप्यादेशस्य स्थानिवद्भावो यथा स्यात्। पचतु[8] - ‘[9]एरुः’ (३.४.८६/२१९६)। अनल्विधौ इति किम्? [10]द्युपथितदादेशा न स्थानिवद् भवन्ति। द्यौः, पन्थाः, सः इति। ‘हल्ङ्याब्भ्यो [11]दीर्घात् सुतिस्यपृक्तं हल्’ (६.१.६८/२५२) इति[12] सुलोपो न भवति॥

## अचः परस्मिन् पूर्वविधौ। (५७/५०)

[13]पूर्वेणानल्विधौ स्थानिवद्भाव उक्तः। [14]अल्विध्यर्थमिदमारभ्यते। [15]आदेशः स्थानिवत् इति वर्तते। अचः इति स्थानिनिर्देशः। [16]परस्मिन् इति [17]निमित्तसप्तमी। पूर्वविधौ इति विषयसप्तमी[18]। [19]अजादेशः परनिमित्तकः [20]पूर्वविधौ कर्तव्ये स्थानिवद् भवति। पटयति[21]। अवधीत्। बहुखट्वकः [22](म. भा. १.१४५)। पटुमाचष्टे[23] इति णिचि टिलोपे कृते तस्य स्थानिवद्भावात् ‘अत उपधायाः’ (७.२.११६/२२८२) इति वृद्धिर्न भवति। अवधीत्[24]–अतो लोपस्य[25] (६.४.४८/२३०८) स्थानिवद्भावाद् ‘अतो हलादेर्लघोः’ (७.२.७./२२८४) इति हलन्तलक्षणा[26] वृद्धिर्न भवति। [27]बहुखट्वकः इति ‘आपोऽन्यतरस्याम्’ (७.४.१५/८९२) इति ह्रस्वस्य स्थानिवद्भावाद्[28] ‘ह्रस्वान्तेऽन्त्यात् पूर्वम्’ (६.२.१७४/३९०८) इति[29] स्वरो न [30]भवति। अचः इति किम्? प्रश्नः[31]। आक्राष्टाम्[32]। आगत्य। प्रश्नः इति प्रच्छेः[33] नङ्प्रत्यये ‘च्छ्वोः शूडनुनासिके च’ (६.४.१९/२५६१) इति छकारस्य शकारः परनिमित्तकस्तुकि [34]कर्तव्ये न स्थानिवद् भवति। [35]आक्राष्टाम् इति ‘झलो झलि’ (८.२.२६/२२८१) इति सिचो लोपः परनिमित्तकः [36]कृषेः षकारस्य ‘षढोः कः सि’ (८.२.४१/२९५) इति ककारे कर्तव्ये न स्थानिवद् भवति। [37]आगत्य इति ‘वा ल्यपि’ (६.४.३८/३३३४) इत्यनुनासिकलोपः परनिमित्तकः तुकि कर्तव्ये न स्थानिवद् भवति। परस्मिन् इति किम्? [38]युवजानिः। [39]वधूटीजानिः। वैयाघ्रपद्यः। आदीध्ये (म.भा. १.१४२)। युवजानिः [40]इति ‘जायाया निङ्’ (५.४.१३४/८७२) [41]न परनिमित्तकः, तेन यलोपे (६.१.६६/८७३) न स्थानिवद् भवति। वैयाघ्रपद्यः इति[42] न परनिमित्तकः पादस्यान्तलोपः (५.४.१३८/८७७) पद्भावं (६.४.१३०/४१४) न प्रतिबध्नाति। आदीध्ये इति दीधीङ[43] उत्तमपुरुषै[44]कवचने टेरेत्वस्यापरनिमित्तकत्वाद् ‘यीवर्णयोर्दीधीवेव्योः’

---

1-2. भवति नास्ति ड. 3. नास्ति क. ड. ब. फ. ह. 4. सुपो लुक् अ. ड. फ. ह. 5. पादादेशः फ. 6. वः ग. 7. स्वश्रयमपि ग. ह. 8. भवतु क. 9. नास्ति ड. 10. द्युपथिमथि इत्यादेशाः फ, द्युपथित्यदादेशाः क. 11. दीर्घात् नास्ति ग. 12. इत्यादिलोपो फ, हल्ङ्यादिलोपो ह. 13. पूर्वेण—आरभ्यते नास्ति क. ड. ई, पूर्वेण सूत्रेण ग. फ. 14. अनल्विधौ इत्यस्य कार्यविशेषे बाधकमारभ्यते अ. 15. स्थानिवदादेशः फ. 16. वाक्यमिदं नास्ति अ. 17. निमित्तस्य सप्तमी फ. 18. सप्तमीनिर्देशः अ. 19. अजन्तादेशः अ, अनादेशः ब. 20. पूर्वस्य विधौ अ. ड. 21. पदयति ह, लघयति इत्यधिकम् अ. क. ड. 22. बहुमालकः इत्यधिकम् ग. फ. ह. 23. पटमाचष्टे फ, पदमाचष्टे अ, इति विगृह्य अति अभि टिलोपे ग. ह. 24. इत्यत्र इत्यधिकम् ग. ह. 25. इति इत्यधिकम् क. 26. विभाषा इत्यधिकम् अ. क. ड. फ. ह. 27. बहुखट्वः ग, ‘शेषाद् विभाषा’ (५.४.१५४/८९१) इति कपि कृते फ, बहुमालः। बहुमालकः ग. ह. 28. स्थानिवत्त्वात् फ. 29. इत्येव फ.ह. 30. प्राप्नोति ह. 31. विश्नः इत्यधिकम् ब.ग.ई. 32. कार्ष्टाम् फ, आकृष्य ह. 33. प्रच्छेः नास्ति अ, प्रच्छेः च्छ्वोः, फ. ह, प्रच्छेः नङ्प्रत्यये कृते ग.फ.ह. 34. कर्तव्ये नास्ति ग. ड. ह. 35. अकार्ष्टाम् फ. 36. सिचि विकल्पेनोपसंख्यानम् इत्यधिकम् अ. क. ड. फ, कृषि सिचि ग. 37. वाक्यमिदं नास्ति ई. 38. लक्ष्मीजानिः अ. 39. वधूजानिः अ. ई, नास्ति क. ग. ड. फ. 40. इति नास्ति क. ड. 41. स परनिमित्तको यलोपेन ग. फ. 42. इत्यत्र अ, इत्यप्यपरः फ. परनिमित्तकं क. 43. दीधीङ नास्ति ग. ह. 44. एकवचनं ह.